Devi bhagwat sthithi;
Sanskrit (printing) chappakhana.— Benaras,
1866, Sanwat - 1924

23995

श्रीगणेशायनमः॥ब्रह्माहरश्चहरिरप्यनिशंस्तुवंतोनांतंगताःसुरवराःकिलतेगुणानां॥क्वाहंविभेदमतिरंबगुणैरतोवै
वक्तुंक्षमस्तवचरित्रमहोप्रसिद्धः॥१॥नत्वाश्रीभारतीतीर्थचरणांभोरुहद्वयं॥विद्यातीर्थःप्रकुरुतेदेवीभागवतस्थितिं
अथदेवीभागवतटीकाकारैःशैवोपनामकनीलकंठपंडितैर्देवीभागवतटीकायामुक्तं॥नारदादिपुराणमते विष्णुभा
गवतंमहापुराणंदेवीभागवतंतुतन्मतेउपपुराणं शैवमात्स्यपुराणादिमतेतुदेवीभागवतंमहापुराणं विष्णुभागवतं
तुतन्मतेउपपुराणमिति॥तत्रदेवीभागवतंमहापुराणमितितुसम्यक्सर्वपुराणसिद्धांतभूतमुक्तं विष्णुभागवतंम
हापुराणमुपपुराणंवेतितुभ्रांत्यालोकरंजनार्थंवाप्रोक्तमितिवदामः विष्णुभागवतेप्रमाणस्यैवाभावात् ननुसारस्वत
कल्पस्येत्यादीनिवचनानिविष्णुभागवतटीकाकारैःश्रीधरस्वामिभिःप्रमाणत्वेनोपन्यस्तानीतिचेन्न तेषांवचनानांविष्णुभा
गवतपरत्वासंभवस्यदेवीभागवतपरत्वस्यचदेवीभागवतटीकायांसमर्थनात् ननुनारदपुराणेद्वादशपुराणानांपृथक्पृथ

कस्सूच्चिराधुनिकपुस्तकेषूपलभ्यते तत्र भागवतसूच्चिरित्थमभिहिता तत्रतु प्रथमस्कंधे सूतर्षीणां समागमः।
व्यासस्य चरितं पुण्यं पांडवानां तथैव च॥ पारिक्षितमुपाख्यानमितीदं समुदाहृतमित्यादिना द्वादशस्कंधानां सू
च्चिरभिहिता तथा भागवतमाहात्म्यद्वयेपि विष्णुभागवतमेव प्रतिपादितं तथान्यान्यपि पुराणेषु भागवतप्र
तिपादकानि वचनान्युपलभ्यंते तैर्वचनैर्भागवतस्य प्रामाण्यमायास्यतीति चेन्न॥ तेषां सर्वेषां वचनानां प्रा
चीनपुस्तकेष्वभावेन धूर्तैः कल्पितत्वेन प्रामाण्याभावात् अतएव श्रीधरस्वामिभिर्भागवतं नामान्यदिति
नाशंकनीयमिति वाक्येनैव देवीभागवतखंडने बहूपरिकरैर्दृढतरप्रमाणभूततादृशवचनानुपलंभात्प्रमा
णाभासवचनैरेव प्रामाण्यमुपादितं॥ किंच॥ यदि सा सूच्चिर्व्यासकृतैव स्यात्तर्हि यथा भागवतस्य सर्वपुराण
स्य सूच्चिः कृता तथा कूर्मपुराणादीनामुच्छिन्नांशानां यत्किंचिदंशेन वर्त्तमानानामपि सर्वांशसूच्चिं कुर्यात् नच

 तथास्ति किंतु यावानंशः संप्रत्युपलभ्यते यस्य यस्य पुराणस्य तस्यैव दृश्यते तस्मात्कल्पितेति निश्चितं भाग 
 वतमाहात्म्यद्वयमप्यप्रमाणं अष्टादशपुराणमध्ये कस्याप्यन्यपुराणस्य सर्वपुराणोत्तमस्य भारतस्य वा
माहात्म्यादर्शनात् नच व्यासस्य भागवतमेव सर्वोत्तमत्वेन वर्तत इति तस्यैव माहात्म्यद्वयं कृतमिति सांप्रतं त
थात्वे सर्वपुराणप्रणयनवैयर्थ्यापत्तेः वामनपुराणे मत्स्यपुराणस्यैव सर्वोत्तमत्वप्रतिपादनाच्च दृश्यंते च संप्रति
कार्त्तिकादिमासमाहात्म्यानि पुराणेष्वेकद्व्यध्यायेनोपलभ्यमानान्यपि लोके त्रिंशदध्यात्मिकानि कल्पिता
न्येव॥ किंच यदि पुराणस्थानि भागवतप्रामाण्यप्रतिपादकानि वाक्यानि प्रमाणानि तदेदमुपलभ्यमानं विष्णुभा
गवतमप्रमाणं तैर्वचनैरन्यदेव पुराणं सिध्येन्नतु विष्णुभागवतं यदि न प्रमाणानि तदा विष्णुभागवतमप्रमाणमि 
त्युभयतः पाशारज्जुः कथमिति चेदुच्यते विष्णुभागवते प्रथमस्कंधे चतुर्थाध्याये सूत उवाच द्वापरे समनु

॥अथश्रीमद्भागवतखंडनपूर्वक देवीभागवतस्थितिः प्रारभ्यते॥ काश्यां त्रिपुरभैरवीसन्नि
धौ श्री ३ युनबाबू फतह नारायणसिंहजीत्यभिधायुजो निकेतने वाराणसीप्रसादस्य का
शीसंस्कृतमुद्रायंत्रेंऽङ्कितम् संवत् १९२४ चैत्र वद्य १४॥

गनयोवेदाश्चमानिताः तदाज्ञापालनंचकृतंभारतव्यपदेशेनवेदार्थोपिविचारितोदर्शितोलोकेभ्यश्च इत्थंयद्यत्सु
कृतंकर्तव्यंपुरुषेणतत्सर्वंमयासंपादितं नकश्चित्कर्तव्यांशोवशिष्टोस्तियेनासंतोषोभवेत् अथापिसंतोषोन
भवतितत्किंकारणंकिंमयाभागवताधर्मानप्रतिपादिताः इतिहेतोर्वान्यहेतोर्वेतिविमर्शंयावत्करोतितावद्देव
नारदआजगाम सकृतपाद्यासनः पप्रच्छासंतोषकारणंततोव्यासेननाहंसंतोषाभावकारणंजानामित्वमेवसर्व
ज्ञोजानासि त्वमेववदेतिव्यासेनप्रोत्तरितेनारदउवाचभवतानुदितप्रायंयशोभगवतोमलमित्यादिनासंतोषा
भावकारणंभागवताप्रणयनरूपंनारदः प्रोक्तवान् पंचमाध्याये। तत्रभारतप्रणयनानंतरमपिव्यासेनभा
गवतप्रणयनरूपःकर्तव्यांशोयदानज्ञातस्तदाभारतात्पूर्वमष्टादशपुराणप्रणयनसमयेनज्ञातइतिकिंवक्तव्यं
एवंसत्यज्ञातविषयरूपभागवतस्यमाहात्म्यप्रणयनंतत्प्रामाण्यसमर्पकवचनप्रणयनंकर्त्तव्यभागवतनाम

स्थि

ग्रहणंचभारतात्पूर्वंजातेष्वष्टादशपुराणेषुकथंकुर्याद्बादरायणः कृतेरिच्छापूर्वकत्वादिच्छायाश्चज्ञानपूर्वकत्वात् तं
मःप्रकाशवद्विरोधस्यजागरूकत्वात् नच्यज्ञानपदार्थस्यासंभावितस्यबुध्यनारूढस्यलक्षणंप्रमाणनिरूपणं
वानामोच्चारणंवाबुद्धिमताक्रियमाणंलोकेक्वचिदप्युपलभ्यते तस्माद्विष्णुभागवतप्रतिपादकानिवचनानिस
र्वथानिर्मूलानीतिप्रमाणवचनाभावाद्भागवतमप्रमाणंयदितानिवचनानिसमूलानीत्येवाग्रहः क्रियतेतदापी
दंपूर्वोक्तविरोधान्नतद्वचनस्यविषयः संभवति किंत्वन्यदेवकिंचिद्भागवतमुच्छिन्नस्वरूपमित्येतस्यप्रामा-
ण्यसमर्पकवचनाभावादिदमप्रमाणमेवेत्युभयतः पाशारज्जुर्दृढतराविराजते किंचमात्स्ये ऋषिभिः पुरा
णसंख्यामाचक्ष्वेत्युक्तः सूत उक्तवान् इदंसर्वंपुराणंशतकोटिप्रविस्तरं हिरण्यगर्भनिर्मितमेकमेवासीत्
तत्कालेनबुद्धिमांद्यादनाकलनप्रसंगेप्राप्तेव्यासरूपेणभगवांस्तदर्थंसंक्षिप्यचतुर्लक्षसंख्ययाप्रतिद्वापरेष्टा

दशपुराणानिकृतवान् हिरण्यगर्भनिर्मितं तु देवलोके शतकोटिप्रविस्तरमद्याप्यस्तीत्युक्तं तत्र व्यासस्यावता
रो वेदविभागार्थमष्टादशपुराणनिर्माणार्थं चेति स्पष्टमेव प्रतीयते तत्र व्यासोवतारं गृहीत्वा यथा वेदविभागं सप्तदश
पुराणानि कृतवांस्तथाष्टादशमं पुराणं कृतमेवेत्यायाति स्वावतारकार्यप्रतिबंधाभावात् यस्मान्मूलपुराणाद्धिर
ण्यगर्भप्रोक्तात्सारांशो ग्राह्यस्तस्य पुराणस्य विद्यमानत्वादेतद्भागवतप्रोक्तसारांशो द्यापि न गृहीत इतिंज्ञानस्या
पि सत्वात् तस्माद्दष्टादशममपि कृतमेवेति वक्तव्यं तदा विष्णुभागवते यन्मया कर्तव्यं तत्कृतं तथापि संतोषः कुतो
न जायत इति व्यासवाक्यकथनेन विष्णुभागवताभिप्रायोपि अष्टादशमं पुराणं जातमेवेति वक्तव्यमन्यथा संतो
षाभावकारणस्याष्टादशमपुराणप्रणयनरूपावशेषस्य विद्यमानत्वेन कुतः संतोषो न जायत इति गवेषणस्या
नुधित्यासंगतिरेव स्यान्नारदेन च तथैवावशिष्टांशो वक्तव्यः स्यात् व्यासस्याष्टादशपुराण प्रणयनार्थं —

प्राप्ते तृतीये युगपर्यये जातः पराशराद्योगी वासव्यां कलया हरेः इत्यनेन व्यासजन्मकथनानंतरं ऋग्यजुःसामा
थर्वाख्या वेदाश्चत्वार उद्धृताः इतिहासः पुराणं च पंचमो वेद उच्यते इत्यनेन व्यासेन वेदविभागः पुराणविभागश्च कृ
त इत्युक्तं तत्राष्टादश पुराणानि कृत्वा सत्यवतीसुतः भारताख्यानमखिलं चक्रे तदुपबृंहणमिति वचनैकवाक्य
तया पुराणमित्यत्र जात्यैकत्वविवक्षया एकवचनं तथा पुराणान्युद्धृतानीत्यर्थः अनंतरं स्त्रीशूद्रद्विजबंधूनां त्र
यी न श्रुतिगोचरा कर्मश्रेयसि मूढानां श्रेय एवं भवेदिह इति भारतमाख्यानं कृपया मुनिना कृतमिति वचनेन
व्यासेन भारतप्रणयनं कृतमित्युक्तं अनंतरं च एवं प्रवृत्तस्य सदा भूतानां श्रेयसि द्विजाः सर्वात्मकेनापि
यदा नातृप्यद्धृदयं ततः नातिप्रसीदद्धृदयः सरस्वत्यास्तटे शुभे इत्यादिना सर्वकर्तव्यसमाप्तावपि
व्यासस्यातिशोकाकुलत्वमुपपादितं अनंतरं च किमर्थं मम संतोषो न जायत इति विमर्शं व्यासः कृतवान् मया गुरवो

दुर्बुधाः महतांतुपुराणानांलक्षणंकथयामिते दशाधिकंलक्षणंच महतांपरिकीर्त्तितमितिब्रह्मवैवर्त्तवचनंलि
खित्वामहापुराणंदशलक्षणलक्षितमस्तीत्युक्तंतत्रवक्तव्यंसर्वेष्वपिमहापुराणेषुप्रथमतःपंचलक्षणत्वं
प्रत्येकंप्रतिपादितंतत्रेदंवचनंदुर्बलंकिंकुर्यात् किंचभवदभिमतभागवतएवदशलक्षणत्वंनान्यपुराणेषु
संभवतितस्मान्महतांतुपुराणानामितिबहुवचनमप्यनुपपन्नमितितद्वचनंकल्पितंवास्तु एकदेशिमतं
वास्तु किंचोत्पत्तिशिष्टवाक्यैस्तत्तत्पुराणपठितैः पंचलक्षणत्वेबोधितेउत्पन्नशिष्टमिदंवाक्यंदुर्बलंकिंकुर्या
त् तस्मान्नेदंभागवतंपुराणंकिंचव्यासकृत पुराणवाणीसमानवाणीकत्वाभावादिदंकाव्यंकेनचिद्धूर्त्तेन
कृत्वास्वमतस्थापनार्थंव्यासशुकनामलिखितमित्येवतत्त्वंकिंचभवतानुदितप्राययशोभगवतोमलमि
तिनारदोपदेशात् व्यासेनकृतमिदमितिप्रथमस्कंधेभिहितंद्वितीयस्कंधेनवमाध्यायेतुशुकपरिक्षित्सं

वादेतुष्टंनिशम्यपितरंलोकानांप्रपितामहंदेवर्षिःपरिपप्रच्छभवान्यन्मानुपृच्छतितस्मादिदंभागवतंपुराणंद
शलक्षणलक्षितं प्रोक्तंभगवताप्राहप्रीतःपुत्रायभूतकृत्॥नारदःप्राहमुनयेसरस्वत्यास्तटेनृप ध्यायतेब्र
ह्मपरमंव्यासायामिततेजसे यदुताहंत्वयापृष्टोवैराजात्पुरुषादिदं यथासीत्तदुपाख्यास्येप्रश्नानन्यांश्चकृत्स्न-
शइत्युक्तं अत्रयद्भगवताप्रोक्तंभागवतंतदेवनारदायप्रोक्तंनारदेनव्यासायप्रोक्तं व्यासेनशुकायशुकेनपरि
क्षितेप्रोक्तमितिलभ्यतेइदंचव्यासकृतपुराणाद्भिन्नमेवपरंपरागतमिति चलभ्यते तदानेदंव्यासकृतं किंतु
व्यासेनप्रकटीकृतमित्येवार्थःकर्तव्योन्यथाव्यासकृतंभागवतमेकंनारदाख्यासंचापरमितिभागवतद्वयंस्या
त्तथाचोपदेशात्पूर्वंव्यासस्यतज्ज्ञानाभावस्यावश्यकत्वेनतत्पूर्वभाविव्यासकृतिषुपुराणेषुतन्नामतन्माहा-
त्म्यकथनंपुराणेष्वंतर्भावश्चकेनवक्तुंशक्यते नहियोब्राह्मणजातीयोनाहमितिस्वमुखेनवदतितंप्रतित्वंब्रा

ह्मणजातीयोसीतिवदति कश्चित् तथेदंभागवतंस्वमुखेनपरंपरागतमहमस्मि नव्यासकृतमितिवदतितंप्र-
तिव्यासः कथंमत्कृतपुराणांतर्गतत्वमितिवदेत् तस्माद्भागवतस्यप्रामाण्यप्रतिपादकाभावादप्रामाण्यं॥
ननुमाभूदष्टादशपुराणांतर्गतमेतत् परंपरागतंस्वतंत्रमेवास्त्विति चेन्न नत्वेतद्वचनेनैतस्यप्रामाण्यंवक्तुंशा-
क्यते एतस्यैवाप्रामाण्ये एतद्वचनस्याप्यप्रमाणत्वात् ननुगौरीतंत्रेभागवतनामग्रहणादेतस्यप्रामाण्यंभविष्य-
तीतिचेन्न तेनवचनेनाप्येतस्याग्रहणात् कथमितिचेदुच्यते यदुत्पत्तिशिष्टवाक्यैः प्रथमद्वितीयस्कंधस्थैः
पूर्वत्रदर्शितैः स्वस्याष्टादशपुराणबहिर्भूतत्वंवदति द्वादशस्कंधांतेतुस्वस्याष्टादशांतर्गतत्वंस्वीकृत्यदानवि-
धिंस्वस्यदर्शयति एतादृशंमिथ्यावादिनंग्रंथंकथंगौरीतंत्रंप्रमाणत्वेनगृह्णीयात् तस्माद्यदिगौरीतंत्रवचनं
प्रामाणिकं तर्हि तद्वचनादेतस्मादन्यदेवोच्छिन्नरूपंपुराणांतरमस्तु देवीभागवतस्यैववातद्वचनेनग्रहणम्-

मवतारइत्यर्थस्यव्यासेनैवपुराणेषुकथितत्वेनतत्स्मरणस्यबुद्धिमतोव्यासस्यसत्वात्तस्मादष्टादशपुराणा
नंतरमेवचित्तस्यासंतोषोजातइत्यवश्यंभागवतवचनबलाद्वक्तव्यंतदातदुत्तरंनारदप्रेरणयाकर्तव्यांशज्ञानो
त्तरंकृतस्यभागवतस्यकथमष्टादशपुराणेषुसंग्रहोब्रह्मणापिकर्त्तुमनुचितःकर्तव्यइतिसुधियोविभावयं
तु किंचहिरण्यगर्भकृतपुराणमेवपंचलक्षणं सर्गश्चप्रतिसर्गश्चवंशोमन्वंतराणिच वंशानुचरितंचेति
पुराणंपंचलक्षणमितिसर्वपुराणपठितवचनात्तन्मूलकानिहिसर्वपुराणानिपंचलक्षणलक्षितान्येवतत्त
त्पुराणमधिकृत्यपंचलक्षणलक्षितत्वस्यैवोक्तत्वात् इदंभागवतंतुदशलक्षणलक्षितंकथमष्टादशपुराणे
षु हिरण्यगर्भपुराणमूलकेष्वंतर्भवेत्॥अतएवकोशेपिपुराणंपंचलक्षणमेवाभिहितं यत्तुकेनचिन्मूर्खेण
सर्गश्चप्रतिसर्गश्चवंशोमन्वंतराणिच॥वंशानुचरितंचेतिपुराणंपंचलक्षणं एतदल्पपुराणानांलक्षणंचवि

ष्विवोपपुराणेष्वप्यंतर्भावाभावेनोपपुराणेषु गृहीतभागवतपदेन कस्य ग्रहणमिति चेद्देवीपुराणस्य वा बंग
देशे प्रसिद्धं यत् महाभागवतमस्ति तस्य वा ग्रहणमिति वदामो न विष्णुभागवतस्येति अथ देवीभागवतप्रमाणा
नि प्राचीनैरुदाहृतानि कानिचिदुदाहरिष्यामः मात्स्ये सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामराः तद्वृत्तांतोद्भ
वं लोके तद्भागवतमिष्यते यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः वृत्रासुरवधोपेतं तद्भागवतमिष्यत इ
ति तत्र सारस्वतस्येत्यत्र सरस्वत्या अयं सारस्वत इति विग्रहः सारस्वत्यास्तथा कल्पो गौरीकल्पस्तथैव चेति
स्कांदात्संकीर्णेषु सरस्वत्याः पितॄणां कल्प उच्यत इति मत्स्यपुराणस्थोपांत्याध्यायस्य वचनाच्च ब्रह्मविष्णुरु
द्राणां कल्पवत् गौरीलक्ष्म्योः कल्पवच्च सरस्वतीकल्पस्यार्थप्राप्तत्वाच्च सरस्वत्यास्तु कल्पस्थं पुराणं यदुदाहृ
तं तच्च भागवतं ज्ञेयं सरस्वत्यास्तु बोधकमिति प्रपंच तत्त्वविवेके शूलपाणिधृतभविष्यवचनाच्च तथा सरस्वत्या 

अयंकल्पोनाम सरस्वत्याआविर्भावो यस्मिन्कल्पे तत्कल्पस्थसरस्वत्याविर्भावादिकथाश्रयंपुराणंभागवतप
दवाच्यमितिवचनार्थः तस्यकल्पस्योत्पत्तिदिनं तु हेमाद्रौ नागरखंडेश्राध्धकल्पेउक्तं सारस्वतस्तु द्वादश्यांशुक्ला
यांसमभून्नृपेति तस्मिन्नेवदिने देव्याउत्पत्तिश्च शिवपुराणेउमासंहितायामुक्ता ब्रह्मणासंस्तुतासेयंमधुकैटभ
नाशने महाविद्याजगध्धात्री सर्वविद्याधिदेवता द्वादश्यांफाल्गुनस्यैवशुक्लायांसमभून्नृपेति तथाचसैवकथात्र
देवीभागवतप्रथमस्कंधेवर्तते नविष्णुभागवते तस्माद्देवीभागवतमेवमहापुराणमितिसिध्धं तथा गायत्रीछंद
श्चत्रिपात् तत्त्रिपादघटितपद्येन समारंभः आरंभोदेवीभागवतेएववर्त्तते सर्वचैतन्यरूपांतामाद्यांविद्यांचधी
महिबुद्धियानःप्रचोदयादिति अन्यत्सर्वंहयग्रीवब्रह्मविद्यादिदेवीभागवतेस्तीति देवीभागवतमेवमहापुराणं
तथा शिवपुराणेमध्यमेश्वरमाहात्म्येभगवत्याश्चदुर्गायाश्चरितंयत्रविद्यते तत्तुभागवतंप्रोक्तं नतुदेवीपुराण

कमिति अस्यार्थो देवीभागवतटीकायांव्याख्यातः तथादुर्गातरंगिणीधृतयामले नवरात्रेतुदेवेशिदेवीभा
गवतंपठेत् जपेत्सप्तशतींचंडीं नियमेनसमाहित इतितथा महेशठक्कुरकृत दुर्गाप्रदीपे देवीयामले देवीभा
गवतंनित्यंपठेद्भक्त्यासमाहितः नवरात्रेविशेषेणश्रीदेवीप्रीतयेमुदे त्यादिवचनैः श्रीदेवीभागवतमेवम
हापुराणमितिसिद्धं अत्रान्यान्यपिवचनानिदेवीभागवतटीकायामुक्तानि तानिगौरवभयान्नेहलिख्यंते
ततएवद्रष्टव्यानीतिशिवं इतिश्रीपरमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थपूज्यपादशिष्येण विद्यातीर्थेनवि
रचितादेवीभागवतस्थितिः समाप्ता॥ यानेत्रपक्ष्मपरिसंचलनेनसम्यक् विश्वंसृजत्यवति हंति निरूढभावा॥ से
वातनोतिसततंद्रुहिणाच्युतेशाः स्तस्याः समस्तदधिकोनहि कोपि देवः॥१॥ श्रीराजेंद्रकिशोरसिंहविजयीदानेंदुचूडा
मणिर्विख्यातश्रेभगोयतींद्रस्तभगानंदानुयुक्तःप्रभुः ख्यातः श्रीत्रिपुरेशिपादमिव्दे मुद्रापितातेनसादेवीभागवतःस्थितिर्विजयते विद्वज्जनाल्हादिनी॥

शुभमाभूयात्

स्तु. अतएवहरिर्द्वाभ्यां रविर्द्वाभ्यांद्वाभ्यांचंडीविनायकौ द्वाभ्यांब्रह्मासमाख्यातः शेषेषु भगवान्भवइ
तिस्कंदवचनव्याख्यायांहरिर्द्वाभ्यांवैष्णववाराहाभ्यां रविर्द्वाभ्यांवामनभविष्याभ्यांचंडीविनायकौभा
गवतेनचंडीब्रह्मवैवर्तेनविनायकः द्वाभ्यांब्रह्माब्रह्मांडब्राह्माभ्यामितिशूलपाणिवाचस्पतिमिश्रादयोपि
चंडीप्रतिपादकंभागवतमेवभागवतपदेनाहुः तस्माद्देवीभागवतमेवमहापुराणंनान्यदितिसिद्धं ननु
तथात्वेधर्मशास्त्रग्रंथेषुकुतोनास्यलेखोस्तीतिमूर्खशंकायाः कः समाधिरितिचेदुच्यते ॥ गारुडे तत्वरह
स्येविनायकपुराणंच बृहत्ब्रह्मांडमेवच पुराणंभागवतंदौर्गंनंदीप्रोक्तं तथैवच पाशुपत्यंरैणुकंचभैरवं
च तथैवचेत्यादिवचनैः समूलानांपुराणानांयथा धर्मशास्त्रेषुनग्रहणं तथैतस्यापीतिसमाधेस्तुल्यत्वात्।
नैतावतापुरुषापराधेनसमूलपुराणंनिर्मूलंभवति नन्वेतस्यविष्णुभागवतस्याप्रमाणत्वान्महापुराणे।

॥ इति देवीभागवतस्थितिः समाप्ता ॥ ६ ॥

Acc. No ..3995
Date...22.5.68

॥ इति देवीभागवतस्थितिः समाप्ता ॥ छ ॥